

श्रीमहालक्ष्मी पञ्चाङ्ग

खेमराज श्रीकृष्णदास प्रकाशन, बम्बई

संस्करण : फरवरी २०१२, संवत् २०६८

मूल्य :- ३५ रुपये मात्र।

Printers & Publishers
Khemraj Shrikrishnadass
Prop: Shri Venkateshwar Press
Khemraj Shrikrishnadass Marg,
7th Khetwadi, Mumbai - 400 004.

Web Site : http://www.khe-shri.com
E-mail : khemraj@vsnl.com

Printed by Sanjay Bajaj for M/s Khemraj Shrikrishnadass
Prop. Shri Venkateshwar Press, Mumbai-400004,

श्रीमहालक्ष्मीपञ्चाङ्गं प्रारभ्यते ॥

अथ श्रीमहालक्ष्मीपञ्चाङ्गानुक्रमणिका ॥

संख्या	विषयाः	पृष्ठांकाः
१	लक्ष्मीपटलम्–	१
२	लक्ष्मीनित्यपूजापद्धतिः–	२
३	लक्ष्मीकवचम्–	१९
४	महालक्ष्म्यष्टोत्तरसहस्रनामस्तोत्रम्–	२३
५	लक्ष्मीस्तोत्रम्–	५२

॥ इति लक्ष्मीपञ्चाङ्गानुक्रमणिका ॥

१	तत्रोक्तं लक्ष्मीकवचम्–	५२
२	सिद्धिलक्ष्मीस्तोत्रम्–	५६
३	श्रीवागीश्वरीस्तोत्रम्–	६०

इत्यनुक्रमणिका समाप्ता ॥

॥ अथ महालक्ष्मीपञ्चाङ्गं प्रारभ्यते ॥

श्रीगणेशाय नमः ॥ अथ वक्ष्ये श्रियो मन्त्रा-
न् श्रीसौभाग्यफलप्रदान् ॥ यस्याः कटा-
क्षमात्रेण त्रैलोक्यमपि वर्द्धते ॥ १ ॥ वातं
वह्निसमारूढं वामनेत्रेन्दुसंयुतम् । बीजमे-
तत् श्रियः प्रोक्तं सर्वकामफलप्रदम् ॥ २ ॥

ल० भानुलक्षं जपेन्मन्त्रं दीक्षितो विजितेन्द्रियः ।
१ तत्सहस्रं प्रजुहुयात् कमलैर्मधुराप्लुतैः
॥ ३ ॥ जपान्ते जुहुयान्मन्त्री तिलैर्वा
मधुरप्लुतैः ॥ बिल्वैः फलैर्वा जुहुयात् त्रिभिर्वा
साधकोत्तमः ॥ ४ ॥ वाग्भवं वनिता वि-
ष्णोर्मायामकरकेतनः ॥ ॥ चतुर्बीजात्मको

---

१ द्वादशलक्षमित्यर्थः ।

मन्त्रश्चतुर्वर्गफलप्रदः ॥ ५ ॥ ऐं श्रीं ह्रीं
क्लीं तारा वाग्भवं मायारमाकामः हंसौ जग-
त्प्रसूत्यै नमः ॥ तथा च वाग्भवं शम्भुनिः-
साररमामकरकेतनः ॥ तार्तीयं च जग-
त्पार्श्वौ वह्निबीजं समुज्ज्वलम् ॥ आद्यंशा-
द्यो भृगुस्तस्यै हन्मन्त्रो द्वादशाक्षरः ॥ महा-
लक्ष्म्याः समुद्दिष्टस्ताराद्यः सर्वसिद्धिदः ।

ल० ॐ ऐं ह्रीं श्रीं क्लीं हं सौं जगत्प्रसूत्यै नमः ॥
२ इति लक्ष्मीपटलं समाप्तम् ॥ ० ॥ श्रीभैरव
उवाच ॥ शृणु देवि प्रवक्ष्यामि पद्धतिं
गद्यरूपिणीम् ॥ श्रीलक्ष्मीनित्यपूजायाः सा-
रात्सारोत्तमोत्तमाम् ॥ १ ॥ तत्रादौ ब्राह्मे मुहूर्ते
उत्थाय बद्धपद्मासनः स्वशिरस्थसहस्रारा-
धोमुखकमलकर्णिकान्तर्गतं निजगुरुं श्वेता-

लंकारालंकृतं वामे स्वशक्त्या रक्ताम्बरया-
ऽऽलिङ्गितं ध्यात्वा॥ २ ॥ मानसोपचारैः संपू-
ज्य दण्डवत् प्रणम्य तदाज्ञां गृहीत्वा बहिरा-
गत्य मलमूत्रादि संत्यज्य वर्णोक्तशौचमाच-
रेत्॥ ३॥ तत्र नद्यादौ गत्वा सुकूर्चद्वादशाङ्गु-
लं कामराजेन दन्तधावनं विधाय वाग्भवेन
गण्डूषत्रयं कृत्वा मूलेन त्रिर्मुखं प्रक्षाल्य

ल० ॥ ४ ॥ ॐ श्रीं ह्रीं मणिधरे वज्रिणि शिखा-
३ परिसरे रक्ष रक्ष ठः ठः फट् स्वाहा ॥ इति
शिखां बध्वा मूलेन त्रिर्मुखं कामराजेन
त्रिः प्राणायामं समूलेन त्रिमुखं प्रक्षाल्य
वासांस्याकृष्य मलापकर्षणस्नानं विधाय
मंत्रस्नानं कुर्यात् ॥ ५ ॥ ततो मूलेन मृद-
मादाय जले प्रोक्षयेत् । मृत्त्रिभागं मूलेन

संशोध्य एकेन भागेन गङ्गेत्यादि तीर्थमा-
वाह्य द्वितीयेन महालक्ष्म्यै विद्महे हरिप्रि-
यायै धीमहि। परिवारयुते देवि जलेऽस्मिन्
सन्निधिं भव॥ इति तु शिवां देवीमावाह्य
कुशमूलयां जले च यंत्रं विभाव्य तृतीयेन
स्वांगं विलिख्य स्वात्मवन्मयीं मूलविद्यामु-
च्चरंस्त्रिशिरःपादपर्यंतं सोपसृजेत्। तत्र

ल० मूलेन षडंगं विधाय देवीं ध्यात्वा मूलं
४ दशधा जपित्वा मूलेन शिरोमार्जनं विधाय
ॐ ह्रीं हंसःश्रीसूर्याय एष तेऽर्घो नम इति
त्रिरर्घ्यं दत्वा जलादवरुह्य वासोन्यत्परिधा-
य सन्ध्यामारभेत् ॥ मूलेन शिरसि मार्जनं
विधाय त्रिराचामेत् ॥ आत्मतत्वं शोधयामि
स्वाहा । मूलं विद्यातत्वं शोधयामि स्वाहा ।

मूलं शिवतत्वं शोधयामि स्वाहा । प्रणवेन प्राणायामं कृत्वा ऋष्यादि षडंगं विधाय वामहस्तेन जलमादाय दक्षहस्तेनाच्छाद्य हं यं रं वं इति त्रिरभिमंत्र्य मूलमुच्चरन् गलितोदकबिन्दुभिस्तत्त्वमुद्रया मूर्ध्नि सप्तधाऽभ्युक्षणं विधाय शेषजलं दक्षहस्ते गृहीत्वा तेजोरूपं ध्यात्वा इडयांतर्नीत्वा पापं

ल० प्रक्षाल्य कृष्णरूपं तज्जलं पापरूपं पिंगलया
५ विरेच्य पुरःकल्पितवज्रशिलायां झडिति
निक्षिपेत्। इत्यघमर्षणं कृत्वा मूलगायत्रीं
जपेत्। श्रीं महालक्ष्म्यै विद्महे हरिप्रियायै
धीमहि॥ तन्नो लक्ष्मीः प्रचोदयात्। इति
यथाशक्ति जपित्वा सशिवायै देव्यै गाय-
त्र्याऽर्घ्यत्रयं दत्वा ऐशान्यां गुरुं दिव्यौघसि-

ह्यौघमानवौघानपि गुरून् संतर्प्य जले पत्रं विभाव्य देवं देवीमावाह्य मूलेन लक्ष्मीं सशिवां तर्पयामि नमः ॥ इति सप्तधा सन्तर्प्य मूलेन लक्ष्मीं सायुधां सवाहनां सपरिवारां सवर्णां ईश्वरसहितां तर्पयामि नमः ॥ पुनः ॐ ह्रीं हं सः मार्तण्डभैरवाय प्रकाश-

१ देवर्षिपितृनित्यर्थः ।

ल० शक्तिसहिताय एष तेऽर्घो नमः ॥ इति
६ त्रिर्मूलेन पितृंस्तर्पयेत् । पुनर्यथाशक्ति गाय-
त्रीं जपेत् ॥ गायत्रीं दशधा जप्त्वा मुच्यते
सर्वकिल्बिषैः । महापातकयुक्तोऽपि याति
देवि परं पदम् ॥ इति जपं देवदेव्योः समर्प्य
हृदि विसृज्य यागगेहमागमेदिति सन्ध्या-
विधिः ॥ ततो गृहद्वारमेत्य द्वारदेवतां पूज-

येत् ॥ वामे गणेशाय नमः ॥ दक्षिणे धर्मा-
य नमः ॥ पश्चिमे वरुणाय नमः ॥ उत्तरे
कुबेराय नमः ॥ इति सम्पूज्य गृहान्तः
प्रविश्य यथाऽहमासनं शोधये नमः ॥ ॐ
अस्य श्रीआसनमन्त्रस्य मेरुपृष्ठ ऋषिः ॥
सुतलं छंदः श्रीकूर्मो देवता आसनविशो-
धने विनियोगः ॥ ॐ पृथ्वि त्वया धृता

ल० लोका देवि त्वं विष्णुना धृता ॥ त्वं च
७ धारय मां देवि पवित्रं कुरु चासनम् ॥ ॐ
ह्रीं अनन्ताय नमः ॐ कूर्माय नमः[1] आधा-
रशक्तिसहस्रारविन्दमकरन्दरंजितकर्णि-
कायै नमः ॥ ॐ समुद्ररसनायै नमः ॥ ॐ
सरस्वत्यै नमः ॥ इति सम्पूज्य ॥ अपसर्पंतु

---

१ इं कूर्माय नमः एवमग्रेपि पुस्तके दृश्यते ।

ये भूता ये भूता भुवि संस्थिताः ॥ ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥ इति तालत्रयं दत्वा वामपार्ष्णिघातत्रयेण विघ्ना-न्भूतांश्च निःसार्य नाराचमुद्रां प्रदर्शयेदि-त्यासनं संशोध्य पूर्ववदाचम्य प्राणायामं त्रिःकृत्वा षडङ्गं विधाय प्राणायामयो-गेन भूतशुद्धिं कुर्यात् ॥ ॐ हुमित्यवगुंठेन

ल० सुषुम्णावर्त्मना प्रदीपकर्णिकाकारं स्वजीवं
८ ब्रह्मपथाऽन्तर्नीत्वा तेजोरूपमैक्यं विभाव्य
आदौ पमिति वायुबीजेन षोडशधा जप्तेन
धूम्रवर्णेन चतुष्कोणेन वामकुक्षिस्थपापपुरुषं
शोषयेत् ॥ ततो रमिति वह्निबीजेन चतुःष-
ष्टिवारजप्तेन रक्तवर्णं शरीरं दाहयेत् ॥
लमितीन्दुबीजेन पीतवर्णेन षट्कोणे गल-

दमृतवृष्ट्या पावयेत्॥ चमिति वरुणबीजेन षोडशवारजप्तेन गलदमृतवृष्ट्या सह पिंगलया रेचयेत्। इति विगतसकलकिल्बिषं दिव्यदेहं विभाव्य प्राणप्रतिष्ठां विदध्यादिति भूतशुद्धिः॥ ॐ सो हं हं सः मम प्राणा इह प्राणाः ॐ सो हं हं सः मम जीवः इह स्थितः ॐ सो हं हं सः मम सर्वे-

न्द्रियाणि ॐ सो हं हं सः इह वाङ्मनस्त्व-
क्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं
तिष्ठन्तु स्वाहा ॥ इति प्राणप्रतिष्ठां विधाय
न्यासपूर्वकं संकल्पं कुर्यात् । अस्य श्रील-
क्ष्मीपूजामन्त्रस्य भृगुऋषिस्त्रिष्टुप्छंदो म-
हालक्ष्मीर्देवता श्रीं बीजं ह्रीं शक्तिः क्लीं
कीलकं मम श्रीधर्मार्थकाममोक्षार्थे विनि-

योगः ॥ अथ करन्यासः ॥ श्रां अंगुष्ठाभ्यां
नमः ॥ श्रीं तर्जनीभ्यां स्वाहा ॥ श्रूं मध्य-
माभ्यां वषट् ॥ श्रैं अनामिकाभ्यां हुम् ॥ श्रौं
कनिष्ठिकाभ्यां वौषट् ॥ श्रः करतलकरपृष्ठा-
भ्यां फट् ॥ अथ हृदयादिन्यासः ॥ श्रां
हृदयाय नमः ॥ श्रीं शिरसे स्वाहा ॥ श्रूं
शिखायै वषट् ॥ श्रैं कवचाय हुम् ॥ श्रौं

ल० नेत्रत्रयाय वौषट् ॥ श्रः अस्त्राय फट् ॥
१० इति करांगन्यासौ ॥ अथादौ ऋष्यादि-
न्यासः ॥ शिरसि भृगुऋषये नमः ॥ मुखे
त्रिष्टुप्छंदसे नमः ॥ हृदि महालक्ष्मीदेवता-
यै नमः ॥ नाभौ श्रींबीजाय नमः ॥ गुह्ये
ह्रींशक्तये नमः ॥ पादयोः श्रीं कीलकाय
नमः ॥ मम श्रीधर्मार्थकामममोक्षार्थे जपे

विनियोगः ॥ सर्वांगे करषडङ्गान्तरमातृका-
न्यासो विधेयः। इति त्रिर्व्यापयेत् ॥ एवं न्यासं
विधाय पूर्ववदाचम्य प्राणायामं कृत्वा गुरुं
ध्यायेत् ॥ अखण्डमण्डलाकारं व्याप्तं येन
चराचरम् ॥ तत्पदं दर्शितं येन तस्मै श्री-
गुरवे नमः ॥ इति श्रीगुरुं प्रणम्य ततो
देवीं सशिवां ध्यायेत् ॥ करयुगलगृहीतं

१० पूर्णकुम्भं दधानां क्वचिदमलगजस्थां शङ्ख-
११ चक्राब्जपाणिं क्वचिदपि दयितांघ्रिं चामर-
व्यग्रहस्तां क्वचिदपि सृणि पाणौ बिभ्रतीं
नौमि लक्ष्मीम् ॥ इति ध्यात्वा मूलं यथाश-
क्त्या जपित्वा जपं देवदेवीभ्यां समर्पयेत् ॥
श्रीचक्रं मनसा विभाव्य विलिख्य वा पूजये
त् ॥ इति ध्यात्वा मानसोपचारैराराध्य बहि-

स्तच्छ्रीचक्रं चतुरस्रं वसुदलालंकृतं वृत्तं मध्ये षड्दशकोणाकारं अस्त्रबिन्दुविराजमानं विचिन्त्य पीठपूजां कुर्यात् ॥ इं मंडूकायनमः इं लं कालाग्निरुद्राय नमः ॥ इं मूलप्रकृत्यै नमः ॥ इं आधारशक्तये नमः॥ इं मध्ये नवरत्नविराजितनवरत्नमयद्वीपाय न-

१ ॐ मण्डूकाय नमः इति साधुः एवमग्रेऽपि ।

ल० मः ॥ इं पद्मराजखण्डाय नमः ॥ इं स्वर्ण-
१२ गिरये नमः ॥ इं नन्दनोद्यानाय नमः ॥ इं
कल्याणाय नमः ॥ इं पद्मवनाय नमः ॥ इं
विचित्ररत्नखचितभूमिकायै नमः ॥ इं चि-
न्तामणिमण्डपाय नमः ॥ इं नवरत्नखचित-
नवरत्नवेदिकायै नमः ॥ इं रत्नसिंहासनाय
नमः ॥ तन्मध्ये सहस्रारपद्माय नमः ॥ इं

प्रकृतिमयपत्रेभ्यो नमः ॥ इं विकृतिमयके-
शरेभ्यो नमः ॥ तन्मध्ये बीजमणिभूषितक-
र्णिकायै नमः ॥ तत्पार्श्वे इं धर्माय इं ज्ञाना-
य इं वैराग्याय इं ऐश्वर्याय इं अधर्माय
इं अज्ञानाय इं अवैराग्याय इं अनैश्वर्याय
मध्ये सं सत्त्वाय रं रजसे तं तमसे मूलमु-
च्चार्य श्रीचक्रे पुष्पाञ्जलित्रये पूर्णपात्रस्था-

३० पनं कुर्यात् इति पीठपूजा ॥ तत्र स्ववामे
१३ त्रिकोणवृत्तचतुरस्रमण्डलं विधाय मूलमु-
च्चार्य श्रीलक्ष्मीसामान्यार्घ्यमण्डलाय नमः॥
तत्र मण्डलेऽस्त्रं क्षालितां त्रिपादिकां शंखं
संस्थाप्य ॐ ऐं क्लीं ह्रीं ॐ अर्कमण्डला-
य द्वादशकलात्मने नमः ॥ इति सम्पूज्य
मूलमुच्चार्य विलोममात्रिकया सम्पूर्य सोम-

मण्डलाय षोडशकलात्मने नमः ।।इत्यभ्यर्च्य
मूलाष्टाभिमन्त्रितं कृत्वा " गङ्गे च यमुने
चैव गोदावरि सरस्वति ॥ नर्मदे सिन्धु का-
वेरि जलेऽस्मिन्संनिधिं कुरु " ॥ इत्यनेन
तीर्थमावाह्य शुद्धं भावयेदिति सामान्यार्घ्य-
विधिः ॥ अथ कलशस्थापनम् ॥ ॐ कल-
शानन्तरं तद्वन्मंगलाय चतुष्टयं प्रपूज्य ॥

ल० तत्र प्रोक्षणीपात्रं पाद्याचमनीयादि परि-
१४ कल्पयेत् ॥ तत्र मूलेन स्नानं तैलाभ्यं-
गस्नानं तीर्थस्नानं विधाय पुनरलङ्कारैरलं-
कृत्य श्रीचक्रं मनसा विभाव्य पूजयेत् ॥
इं गन्धाक्षतपुष्पाणि नमः ॥ इं जं जपध्व-
निमातर्घण्टायै मूलेन धूपदीपादि निवेदये-
त् ॥ नैवेद्याचमनीयं गन्धताम्बूलच्छत्र-

चामरादीन् निवेदयेत् । मूलेन षडङ्गं वि-
धाय चतुरस्रं पूजयेत् ॥ इं सर्वसिद्धिप्रदा-
यकाय चक्राय नमः ॥ इति पुष्पाञ्जलिं
दत्वा ॥ ४ ॥ ॐ ह्रीं श्रीं गं गणपतये
नमः ॥ इं धं धर्मराजाय इं वं वरुणाय इं कुं
कुबेराय ॥ ततः स्वहृदयाद्देवीपुष्पमालामा-
नीय ॥ ॐ देवेशि भक्तिसुलभे परिवारसम-

न्विते ॥ यावत्त्वां पूजयिष्यामि तावत्त्वं सु-
स्थिरा भव ॥ इत्यावाहनादिमुद्रां प्रदर्श्य
पाद्यादिना सम्पूज्य बिन्दौ देवीं त्रिः सम्पू-
ज्य सन्तर्प्य देव्या आज्ञां गृहीत्वा आवरण-
पूजामारभेत् ॥ यथा-आदौ गुरुपूजा ॥ ॐ
विभूतिः श्रीपादुकां पूजयामि नमः ॥ ॐ
उन्मतिः श्रीपा० ॥ ॐ ऋषिः श्रीपादु० ॥

ॐ उत्कृष्टिः श्री० ॥ ॐ ऋद्धिः श्री० इति
केशरेषु पूर्वादिमध्ये पीठशक्तिं पीठमनुञ्च
पूजयेत् ॥ प्रणवादिनमोऽन्तेनाऽर्च्चयेत् ॥
तदुपरि श्रीं कमलासनाय नमः वामावर्तेन
पूजयेत् केशरेष्वह्न्यादिकोणेषु मध्ये दिक्षु
चतुरस्त्रं ॥ हृदयाय नमः ॥ इत्यादिना षड-
ङ्गानि पूजयेत् ॥ दिग्दलेषु पूर्वादितः द-

ल० क्षिणावर्तेन पूजयेत् ॥ ॐ वासुदेवाय नमः ॥
१६ ॐ संकर्षणाय० ॥ ॐ प्रद्युम्नाय० ॐ अनिरु-
द्धाय० ॥ विद्लेषु ॐ मद्काय नमः ॥ ॐ
सलिलाय० ॐ गुग्गुलवे० ॥ ॐ कुरण्टकाय
नमः ॥ ततो देव्या दक्षिणे ॐ शङ्खनिधये
नमः ॥ ॐ वसुधारायै नमः ॥ वामे ॐ
पद्मनिधये नमः ॥ ॐ वसुमत्यै नमः ॥ ततः

पत्राग्रेषु पूर्वादितः ॥ ॐ बलाक्यै नमः ॥ ॐ विमलायै० ॥ ॐ कमलायै० ॥ ॐ वनमालिकायै० ॥ ॐ विभीषिकायै० ॥ ॐ कालिकायै० ॥ ॐ वसुमालिकायै०॥ प्रणवादिनमोऽन्तेन पूजयेत् ॥ इति चतुर्थावरणम् ॥ तद्बहिरिन्द्रादीन् वज्रादींश्च पूजयेत् ॥ ॐ इन्द्राय नमः ॥ ॐ अग्नये० ॥ ॐ यमा-

ल० य० ॥ ॐ निर्ऋतये० ॥ ॐ वरुणाय० ॥
१७ ॐ अनलाय० ॥ ॐ कुबेराय० ॐ ईशाना-
य० ॥ ऊर्ध्वे ॐ ब्रह्मणे० ॥ ॐ अनन्ताय० ॥
ॐ वज्राय० ॥ ॐ शक्तये नमः ॥ ॐ दण्डा-
य० ॥ ॐ खड्गाय० ॥ ॐ पाशाय० ॥ ॐ
अंकुशाय० ॥ ॐ गदायै० ॥ ॐ त्रिशूलाय०
॥ ॐ चक्राय० ॥ ॐ पद्माय० ॥ इति

सम्पूज्य ॥ षष्ठमावरणम् ॥ तद्बहिः ॐ हेरम्बभैरवाय० ॥ ॐ वेतालभैरवाय० ॥ ॐ त्रिपुरान्तकभैरवाय०॥ ॐ एकपालभैरवाय० ॥ ॐ अग्निजिह्वभैरवाय० ॥ ॐ तारकेश्वर भैरव श्रीपादुकां पूजयामि इति सम्पूज्य सप्तमावरणम् ॥ ततो देव्या अग्रे संकल्पपूर्वन्यासं विधाय षडङ्गं कृत्वा देवीं

ल० ध्यात्वा यथाशक्ति जपं विधाय देवदेव्योर्जपं
१८ समर्प्य कवचसहस्रनामस्तवपाठं विधाय समर्प्य ॥ ॐ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्॥ सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥ मूलं त्रिरुच्चार्य नैवेद्याचमनीयताम्बूलादीन्समर्पयेत् ॥ ततो मूले क्षेत्रपालपूजा मूलेन छत्रचामरारार्तिकादीन्नि-

वेद्य बलिं विसृज्य ॥ प्रातः प्रभृति सायाह्नात्
सायाह्नात् प्रातरन्ततः ॥ यत्करोमि जगद्योने
तदस्तु तव पूजनम् ॥ इति दण्डवत् प्रण-
म्य मूलेन पुष्पाञ्जलिं दत्वा संहारमुद्रया स्व-
हृदि देवीं विसृज्य स्वयमिति सदाशिवो
भूत्वा स्वशक्त्या सह सुखं विहरेत् ॥ इति
पूजाविधिः॥ इत्येषा पद्धतिर्गुह्या श्रीलक्ष्म्या

ल० गद्यरूपिणी ॥ रहस्याचारगर्भा च गोपनीया
१९ स्वयोनिवत् ॥ इति श्रीरुद्रयामले विश्व-
सारोद्धारे तंत्रे श्रीलक्ष्मीनित्यपूजापद्धतिः
समाप्ता ॥ ॥ ॥

॥ ॥ अथ लक्ष्मीकवचम् ॥ ॥

नारदउवाच ॥ आविर्भूय हरिस्तस्मै किं
स्तोत्रं कवचं ददौ । महालक्ष्याश्च लक्ष्मीश-

स्तन्मे ब्रूहि तपोधन ॥१॥ नारायण उवाच ॥
पुष्करे च तपस्तप्त्वा विरराम सुरेश्वरः । आ-
विर्बभूव तत्रैव क्लिष्टं दृष्ट्वा हरिः स्वयम् ॥२॥
तमुवाच हृषीकेशो वरं वृणु यथेप्सितम् ॥
स च वव्रे वरं लक्ष्मीमीशस्तस्मै ददौ मुदा
॥३॥ वरं दत्त्वा हृषीकेशस्तं वक्तुमुपचक्रमे ॥
हितं पथ्यञ्च सारं च परिणामसुखावहम्

ल० ॥ ४ ॥ मधुसूदन उवाच ॥ गृहाण कवचं
२० शक्र सर्वदुःखविनाशनम् ॥ ब्रह्मणे च पुरा
दत्तं संसारे च जलप्लुते ॥५॥ यद्धृत्वा जगतां
स्रष्टा सर्वैश्वर्ययुतो विधिः । बभूवुर्मनवः सर्वे
सर्वैश्वर्ययुता यतः ॥६॥ सर्वैश्वर्यप्रदस्यास्य
कवचस्य ऋषिर्विधिः । पंक्तिच्छन्दश्च यद्देवी
स्वयं पद्मालया सुर ॥७॥ सिद्धैश्वर्यजपेष्वेव

विनियोगः प्रकीर्तितः ॥ धृत्वा च कवचं लो-
कः सर्वत्र विजयी सुखी ॥८॥ मस्तकं पातु
मे पद्मा कण्ठं पातु हरिप्रिया ॥ नासिकां पातु
मे लक्ष्मीः कमला पातु लोचनम् ॥ ९ ॥
केशान् केशवकान्ता च कपालं कमलालया ॥
जगत्प्रसूर्गण्डयुग्मं स्कन्धं सम्पत्प्रदा सदा
॥ १० ॥ ॐ श्रीं कमलवासिन्यै स्वाहा

२० पृष्ठं सदाऽवतु ॥ ॐ श्रीं पद्मालयायै स्वाहा
२१ वक्षः पातु सदा मम ॥ ११ ॥ पातु श्रीर्मम
कङ्कालं बाहुयुग्मं च श्रीं नमः ॥ ॐ ह्रीं श्रीं
लक्ष्म्यै नमः पादौ पातु मे सततं चिरम् ॥
॥ १२ ॥ ॐ श्रीं ह्रीं नमः पद्मायै स्वाहा पातु
नितम्बकम् । ॐ श्रीं महालक्ष्म्यै स्वाहा सर्वा-
ङ्गं पातु मे सदा ॥१३॥ ॐ श्रीं ह्रीं क्लीं महा-

लक्ष्म्यै स्वाहा मां पातु सर्वतः ॥ इति ते कथितं वत्स सर्वसम्पत्करं परम् ॥ १४ ॥ सर्वैश्वर्यप्रदं नाम कवचं परमाद्भुतम् ॥ गुरुमभ्यर्च्य विधिवत्कवचं धारयेत्तु यः ॥१५॥ कण्ठे वा दक्षिणे बाहौ सर्वत्र विजयी भवेत् ॥ महालक्ष्मीर्गृहं तस्य न जहाति कदाचन ॥ १६ ॥ तस्य च्छायेव सततं सा

८० च जन्मनि जन्मनि ॥ १७॥ इदं कवच-
२२ मज्ञात्वा भजेल्लक्ष्मीं सुमन्दधीः ॥ शतलक्ष-
प्रजप्तोऽपि न मन्त्रः सिद्धिदायकः ॥ १८ ॥
इति श्रीब्रह्मवैवर्ते महापुराणे नारायणनार-
दसंवादे गणपतिखण्डे श्रीमहालक्ष्मी-
कवचं समाप्तम् ॥

अथ श्रीमहालक्ष्म्यष्टोत्तरसहस्रनामस्तोत्रं ॥
सनत्कुमार उवाच ॥ साधु पृष्टं महाभागैः
सर्वलोकहितार्थिभिः ॥ महतामेष धर्म्मः
स्यान्नान्येषामिति मे मतिः ॥ १ ॥ ब्रह्मविष्णु-
महादेवैर्महालक्ष्मीः स्तुता परा ॥ प्रोक्ता ता
कथयिष्यामि दुःखदारिद्र्यभञ्जनीम् ॥ २ ॥
ॐ अस्य श्रीमहालक्ष्म्यष्टोत्तरसहस्रनाम-

ल० स्तोत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः अनु-
२३ ष्टुप् छंदः श्रीमहालक्ष्मीर्देवता श्रीमहाल-
क्ष्मीप्रीत्यर्थे जपे विनियोगः ॥ देवा ऊचुः॥
महालक्ष्मीर्महाकाली महाकन्या सरस्वती
महासरस्वती देवी भक्तानुग्रहकारिणी ॥१॥
ईशा वाच्या महादेवी महामाया सरस्वती ॥
हृल्लेखा परमा शक्तिर्म्मातृका बीजरूपिणी

॥२॥ नित्या सर्वगताऽनन्ता नित्यानन्दा नि-
रञ्जना ॥ नित्या प्रकाशिनी देवी स्वयंप्रका-
शरूपिणी ॥ ३ ॥ त्रिपुरा भैरवी विद्या हंसी
योगेश्वरी शिवा । वागीश्वरी महारात्रिः का-
लरात्रिस्त्रिलोचना॥४॥ भद्रकाली करालीशा
उमा गौरी तिलोत्तमा । काली कराली वि-
क्रान्ता कामाक्षी कामदा शिवा ॥ ५ ॥ च-

ल० ण्डिका चण्डरूपेशा चामुण्डा लिङ्गधारिणी ।
२४ त्रैलोक्यविजया देवी त्रैलोक्यविजयोत्तमा
॥ ६ ॥ सिद्धलक्ष्मीः श्रिया देवी मोक्षमार्ग-
प्रदायिनी । उमा भगवती दुर्गा चण्डी दा-
क्षायणी वरा ॥ ७ ॥ प्रत्यङ्गिरा धरा वेला
लोकमाता हरिप्रिया ॥ पार्वती परमा विद्या
ब्रह्मविद्याप्रदायिनी ॥ ८ ॥ अरूपा बहु-

रूपा च सुरूपा विश्वरूपिणी। पञ्चभूतात्मि-
का देवी चण्डिका चण्डरूपिणी ॥ ९ ॥ का-
शिका पञ्चिका पंक्तिर्हविष्मत्पादपंक्तिका।
देवमाता सुरेशानी देवगर्भाऽम्बिका धृतिः
॥१०॥ सन्ध्या जातिः क्रिया व्यक्तिः प्रकृति-
र्मोहिनी मही। यज्ञविद्या महाविद्या गुह्यवि-
द्या विभावरी ॥ ११ ॥ ज्योतिष्मती महा-

ल० माता सर्वमंत्रफलप्रदा। दारिद्र्यध्वंसिनी देवी
२५ हृदयग्रन्थिभेदिनी ॥ १२ ॥ सहस्रादित्य-
संकाशा चन्द्रिका चन्द्ररूपिणी। अकारादि-
क्षकारान्ता मातृका च प्रमातृका ॥ १३ ॥
गायत्री सामसम्भूतिः सादित्या प्रणवा-
त्मिका। शाङ्करी वैष्णवी ब्राह्मी सर्वदेवनम-
स्कृता ॥ १४ ॥ नवदुर्गा विशालाक्षी करवी-

रनिवासिनी। कुब्जिका कौलिका शावी वीणा-
पुस्तकधारिणी ॥ १५ ॥ सर्वशक्तिस्त्रिशक्ति-
श्च ब्रह्मविष्णुशिवात्मिका ॥ इडा पिङ्गलम-
ध्यस्था मृडाली तन्तुरूपिणी ॥ १६ ॥ यज्ञ-
सेना ध्रुवा दीक्षा दक्षिणा सर्वमोहिनी ॥ अ-
ष्टांगयोगिनी देवी निर्बीजध्यानगोचरा ॥
॥ १७ ॥ सर्वतीर्थस्थिता शुद्धा सर्वपर्वत-

ल० वासिनी ॥ वेदशास्त्रप्रमारूपा सषडंगपदक्र-
२६ मा ॥ १८ ॥ शिवा धात्री शुभा नन्दा यज्ञ-
कर्म्मस्वरूपिणी ॥ व्रतिनी मौनिका देवी
ब्रह्माणी ब्रह्मचारिणी ॥ १९ ॥ एकाकारपरा
तारा तारकी भयभञ्जिनी ॥ ऋतंभरा धराधा-
रानिराधाराऽधिकस्वना ॥२०॥ राका कुहूर-
मावास्या पूर्णिमाऽनुमतिर्द्युतिः॥ सिनीवाली

शिखा वेश्या वैश्यदेवी पिशङ्गिका॥२१॥पि-
लिपिला विशालाक्षी रक्षोघ्नी वृष्टिकारिणी ॥
दुष्टविद्राविणी देवी सर्वोपद्रवनाशिनी ॥ २२
जया च विजया चैव जयन्ती चापराजिता ॥
शारदा शरसन्धाना सर्वशास्त्रार्थधारिणी ॥
॥ २३ ॥ विश्वम्भरा कार्यकर्त्री नित्या नि-
र्मलभञ्जिनी ॥ सन्ध्या रात्रिर्दिवा ज्योत्स्ना

ल० कला काष्ठा निमेषिका॥२४॥ गुर्वी कात्यायनी
२७ शुभ्रा संसारार्णवतारिणी॥ कपिला कालिका
शाला मालिका नवमल्लिका ॥ २५ ॥ देवि-
का नन्दिका शान्ता भञ्जिका सर्वभञ्जिका ॥
दिवा सर्वशशी कान्ता कन्यका कमलोद्भवा
॥ २६ ॥ त्रिसूक्तलक्षणा देवी दुर्गा सूक्तप्र-
बोधिका । श्रद्धा मेधा धृतिः प्रज्ञा धारणा

शान्तिरेव च ॥ २७॥ श्रुतिः स्मृतिर्धृतिर्ध-
न्या गतिरिष्टिर्मनीषिणी ॥ काशिका वयशा-
मीशा शक्त्यादिः पथिका स्थिता ॥ २८ ॥
विरक्ता वैष्णवी माया सर्वमायाप्रभञ्जिनी ॥
माहेन्द्री मंत्रपुष्टाङ्गा माहेन्द्रजालरूपिणी
॥ २९ ॥ अवस्थात्रयनिर्मुक्ता सर्वरोगविव-
र्जिता ॥ दूषणत्रयनिर्मुक्ता सर्वदोषविवर्जिता

८० ॥ ३० ॥ योगध्यानैकरम्या सा योगध्या-
२८ नपरायणा ॥ त्रयी सन्ध्या विशोका च वेदा-
न्ता ज्ञानरूपिता ॥ ३१ ॥ भारती कमला
भासा पद्मा हैमवती स्मृतिः ॥ गोतमी गौत-
मी गौरी ईशानी हंसवाहिनी ॥ ३२ ॥ ना-
रायणी प्रभा धारा जाह्नवी शंकरात्मजा ।
व्याघ्रचर्मपरीधाना नागयज्ञोपवीतिनी ॥

॥ ३३ ॥ निर्मांसा भस्मदिग्धाङ्गी ब्रह्मकङ्का-
लधारिणी ॥ विशीर्णा च विशालाङ्गी माया
देवी सुरेश्वरी ॥ ३४ ॥ चित्रघण्टासुनासा च
मानवी मनुसम्भवा ॥ स्तम्भिनी स्तोभिनी
वीणा त्रायणी भ्रामिणी कृतिः ॥ ३५ ॥ मो-
हिनी द्वेषिणी घोरा घोरेशा घोररूपिणी ॥
रुद्रैकादशिनी पुण्या कल्याणी लाभकारिणी

ल० ॥ ३६ ॥ विद्युन्मती महाद्युतिः सप्तदुर्गाष्टभै-
२९ रवी ॥ सूर्य्यचन्द्रार्धमास्याग्रहस्तनक्षत्ररूपि-
णी ॥ ३७ ॥ बिन्दुनादकलातीता बिन्दुना-
दकलात्मिका ॥ दिशा वायुर्जयकरी कला-
षोडशसंयुता ॥ ३८ ॥ काश्यपी कमला देवी
नाभिचक्रनिवासिनी ॥ षडाधारस्थिता गुह्या
दैविका चक्ररूपिणी ॥ ३९ ॥ अविद्या शर्वरी

शुभ्रा सुरासुरनिबर्हणा ॥ त्रिकार्या त्रिकला
शुभ्रा कर्मनिर्म्मलकारिणी ॥ ४० ॥ आदि-
लक्ष्मीर्गुणाधारा पञ्चब्रह्मा पिकावलिः ॥ कृत-
ब्रह्ममुखावासा सर्वदेवस्वरूपिणी ॥ ४१ ॥
सुतसंजीविनी देवी कामिका कामवर्जिता ॥
निर्वाणमार्गदा देवी हंसिनी कार्मुकी क्षमा
॥ ४२ ॥ अविद्यागणना वेधा निर्गुणा ख-

ल० ण्डिका सुधा ॥ सौमिकी वेदिरिज्या स्याच्छब-
३० री चक्रधारिणी ॥ ४३ ॥ दण्डिनी मुण्डिनी
व्याघ्री शंकिनी सोमसंहतिः ॥ सौदामिनी
दानदा च पञ्चबाणप्रभञ्जिनी ॥ ४४ ॥ बाणा
शोणा सहस्राक्षी सहस्रभुजपादुका ॥ स-
न्ध्यावली त्रिसन्ध्याक्षा ब्रह्माण्डमणिभूषणा
॥ ४५ ॥ रतिका रत्नमाला श्रीः कामधेनुरु-

रुक्मा ॥ चिन्तामणी रूपदेवी कणिका कर्ण-
भूषणा ॥ ४६ ॥ अश्वत्थचरणा सेना का-
शिका कामभञ्जिनी ॥ पञ्चप्रणवरूपा हि का-
न्ता काम्या वरानना ॥ ४७ ॥ मन्त्रब्राह्मण-
विद्यार्थी वादरूपा हविष्मती ॥ अथर्वणी
श्रुतिः शून्या कल्पान्ता वर्जिता सती॥४८॥
सत्ता जातिः प्रभा मैत्री प्रमितिः प्रणवा

ल० गतिः॥ अथर्वणी पञ्चवर्णा सर्वदा भुवनेश्वरी
३१ ॥ ४९ ॥ त्रैलोक्यवाहिनी विद्या सर्व धाराऽ-
क्षरा क्षरा ॥ हिरण्यवर्णा हरिणी सर्वोपद्रव-
भेषजा ॥ ५० ॥ कैवल्यपदवी रेखा सूर्यम-
ण्डलसंस्थिता ॥ वायुमण्डलमध्यस्था व्योम-
मण्डलसंस्थिता ॥ ५१ ॥ चक्रिका चक्रमध्य-
स्था चक्रमार्गप्रदायिनी॥ कालिकाकुलचक्रे-

शा यक्षकी पंक्तिपावनी ॥ ५२ ॥ सर्वसिद्धा-
न्तमार्गस्था षड्वर्णा वर्णवर्जिता ॥ शतरूपा
महातन्त्री सर्वसंहारकारिणी ॥ ५३ ॥ सर्वतु-
ष्टिकरा देवी सर्वपालनकारिणी ॥ पुरुषी
पौरुषी वृष्टिः सर्वतत्वप्रसूतिका ॥ ५४ ॥
अर्धनारीश्वरी देवी सर्वविद्याप्रदायिनी ॥
भार्गवी याजुषी विद्या सर्वोपनिषदास्थिता

ल० ॥ ५५ ॥ त्रिकाण्डज्ञानसम्पत्तिर्नादिनी कम-
३२ लानना ॥ सूक्ष्मा शान्तिः पृथा देवी माधवी
गन्धवाहना ॥५६॥ अचिन्त्या लक्षणा गोत्रा
नामजात्यादिवर्जिता । सत्तामात्रास्थिता छि-
न्ना केवलज्ञानदीपिका ॥ ५७ ॥ व्योमके-
शाऽखिलाधारा पञ्चकोशविलक्षणा॥पञ्चको-
शात्मिका देवी पञ्चब्रह्मात्मिका वशा ॥५८॥

जया जरा जनित्री च लोकालोकप्रसूतिका॥ वाग्देवी भरणाकारा सर्वसाम्यास्थिता स्थितिः॥५९॥ अष्टाष्टकचतुःषष्टिपीठिका विद्यया युता॥कालिन्दी कर्म्मणी श्यामा यक्षिणी किन्नरेश्वरी ॥ ६० ॥ केतकी मल्लिका शोणा वाराही धरणी धरा ॥ नारसिंही महोग्रास्या भक्तानामार्तिनाशिनी ॥ ६१ ॥ अन्तर्बहिः-

ल० स्थिता लक्ष्मीर्जरामरणनाशिनी ॥ त्रियम्ब-
३३ का महानारी सोमसूर्याग्निलोचना॥६२॥अ-
दितिर्देवमाता श्रीरष्टपुत्राऽष्टयोनिका ॥ अ-
ष्टप्रकृतिरष्टासिर्विभ्राष्टिर्विकृताकृतिः॥६३॥
दुर्भिक्षध्वंसिनी देवी सिता सत्यांकरूपि-
णी ॥ ख्यातिजा भार्गवी देवी देवयाना तप-
स्विनी॥६४॥ शाकम्भरी महाघोरा गरुडोप-

रिसंस्थिता ॥ सिंहगा व्याघ्रगा देवी वायुगा
वारुणी नरा ॥६५॥ अकारादिहकारान्ता स-
र्वविद्याधिदेवता ॥ सिद्धमन्त्रव्याकरणा ज्यो-
तिःशास्त्रस्वरूपिणी ॥ ६६ ॥ इडापिङ्गलम-
ध्यस्था सुषुम्ना नाभिभेदिनी ॥ कालचक्राक्ष-
युक्ता सा कालचक्रप्रवर्तिनी ॥६७॥ वैशारदी
मतिश्रेष्ठा सर्वदा सर्वदीपिका ॥ वैनायकी

ल० महाघोरा श्रेणी मौली वलिर्वलिः ॥ ६८ ॥
३४ जम्भनी जम्भिनी जम्भा कणिका गणिका
शरा॥शरभा वक्रिकाऽनन्ता सर्वव्याधिप्रभे-
षजा ॥ ६९ ॥ देवकी देवसङ्काशा वारधी
करुणाकरा॥शाम्भवी सर्वसम्पन्ना सर्वपाप-
प्रभञ्जिनी ॥ ७० ॥ एकमात्रा द्विमात्रा च
त्रिमात्रा च तथापरा । अर्द्धमात्रा तथा सू-

क्ष्मा तस्याप्यर्द्धा तथा परा ॥ ७१ ॥ एक-
वीरा विशालाक्षी षट्पदार्थमनास्विनी॥नैष्क-
र्म्या निष्कला काला ज्ञानकर्म्मात्मिका गुणा
॥ ७२ ॥ सन्दोहानन्दसन्दोहा व्योमाकारा
निरूपिता ॥ गद्यपद्यात्मिका वाणी सर्वालं-
कारसंयुता ॥ ७३ ॥ साधुबद्धप्रदन्यासा स-
र्वत्र घटवासिनी ॥ षट्तर्कतर्किताकारा सर्व-

ल० तर्कविवर्जिता ॥७४॥ आदित्यवर्णवर्णा सा
३५ तमसः पाररूपिणी ॥ ब्रह्मण्या ब्रह्मसम्पन्ना
ब्रह्मसम्पत्तिरूपिणी ॥ ७५ ॥ पुराणन्याय-
मीमांसाधर्म्मशास्त्रीयमिश्रिता । वेदिका
वेदरूपाढ्या कालिका कालरूपिणी ॥७६॥
परायणी महादेवी सर्वतत्वप्रवर्तिनी॥ हिर-
ण्यबहुरूपाढ्या हिरण्यपदसम्भवा ॥७७॥

कैवल्यपदवी पुण्या कैवल्यज्ञानगोचरा॥ब्र-
ह्मसम्पत्तिरूपाढ्या ब्रह्मसम्पत्तिशालिनी ॥
॥ ७८ ॥ भरणी च्छरणी धारा सर्वलोकवि-
वर्तिनी॥ पाशांकुशधरा देवी वीणावाद्याक्ष-
सूत्रिणी ॥ ७९ ॥ एकमूर्तिस्त्रयी धारा मधु-
कैटभभञ्जिनी॥ संख्या सांख्यायनी ज्वाला
लतिका कामरूपिणी ॥ ८० ॥ जाग्रतिः स्व-

ल० प्रसम्पत्तिः सुषुप्तिः परिदायिनी ॥ करालिनी
३६ महादंष्ट्रा भ्रुकुटीकुटिलानना ॥ ८१ ॥ सर्व-
वासा सुवासाश्च बृहती जगती समा ॥ छ-
न्दोनुष्टुप् प्रतिच्छंका कलुषी करुणात्मिका
॥८२॥ एकाक्षरपरा युक्ता सर्वदोषप्रभञ्जि-
नी ॥ चक्षुष्मती महादोषा रवड्गचर्म्मधरा
मितिः ॥८३॥ शिल्पविद्याधरा देवी सर्वतो

भद्रकालिनी ॥ अचिन्त्यलक्षणाकारा सूत्रजा-
प्यनिबन्धना ॥ ८४ ॥ सर्ववेदान्तसम्पत्तिः
सर्वशास्त्रार्थमातृका ॥ अकारादिक्षकारान्ता
वर्णा मात्रा लिपिक्रिया ॥८५॥ स्वाहा स्वधा
च रूपाढ्या स्तोभाक्षरनिरूपिता ॥ द्वयी
विद्या सदानन्दा त्रयी विद्या सदाशिवा
॥८६॥ सर्ववेदान्तसम्पत्तिः सर्वशास्त्रार्थमा-

ल० तृका ॥ सर्वज्ञा सर्वशक्तिश्च खेचरी सर्वगा
३७ वरा॥८७॥ हंसयुक्तविमानस्था हंसारूढा श-
शिप्रभा॥भावना वासना भीतिराहतीरमला
वसा ॥८८॥ अणिमादिगुणोपेता परा काष्ठा
परागतिः॥ तन्त्री विचित्रमाभाषा व्योमगङ्गा
वलिप्रिया ॥ ८९ ॥ चरुषी चारुषी वेश्या
ऋग्यजुःसामरूपिणी ॥ महानदी महापुण्या

गङ्गा पुण्याङ्गनाप्रिया॥९०॥समाधिर्धारिणी
ध्येया श्रोतव्या श्रोत्रिया घृणिः । नामाख्या-
नपरा देवी ह्युपसर्गभुजा भुजी ॥ ९१ ॥ नि-
र्यातोरुद्वयाजंघा मात्रा मात्री विशेषणा ॥
आसीना शयनारूढा तिष्ठन्ती धावतीति च
॥ ९२ ॥ लक्ष्यालक्ष्यस्वरूपाढ्या सुरूपा ग-
णिकाकृतिः ॥ एकरूपा तथारूपा द्वयरूपा

ल० तथाकृतिः ॥ ९३ ॥ समासतद्धिताकारा वि-
३८ भक्तिव्यञ्जनाकृतिः । स्वराकारा निराकारा
स्त्रीप्रत्ययविभूषिता ॥९४॥ गंभीरा गहना
गुह्या योनिलिङ्गाङ्गरूपिणी ॥ शेषवासुकिह-
स्ता च ब्रह्माण्डफलचर्वणा ॥ ९५ ॥ कारु-
ण्याकारसम्पत्तिः कीलका मन्त्रकीलका ॥
शक्तिबीजात्मिका सर्वा मन्त्रभृल्लक्षिता मनुः

॥९६॥ आग्नेयी पार्वती चार्प्या वायव्या व्यो-
मका तनुः ॥ सत्यज्ञानात्मिकानन्दा ब्रह्मा
ब्राह्मी सनातनी ॥ ९७ ॥ अविद्या वासना
माया प्रकृतिर्मोहिनीति च ॥ शक्तिराधारश-
क्तिश्च चिच्छक्तिश्चातिशक्तिका ॥ ९८ ॥ व-
क्राकृषी महामारी मारीची मारसूदिनी ॥ वी-
रा विरजमार्गस्था सर्वमार्गप्रदायिनी॥९९॥

ल० जाड्यापहाऽमृताऽनन्दा भवानी भवभञ्जिनी
३९ ॥ त्रिकालज्ञानसंताना त्रिकालज्ञानदायिनी
॥ १०० ॥ नानाजातिस्मृतिः प्रज्ञा रात्रिर्देवा
त्रिलोचना ॥ परचित्तविधानज्ञा वैशेषिक-
गुणाश्रया ॥१॥ हिरण्यकेशिनी देवी ब्रह्मसू-
त्रविचक्षणा ॥ एकाद्ययुतपर्यन्ता वर्णमात्रा-
त्मिकापरा॥२॥मधुमती मधुनाशा मधुराशा

मधुप्रिया॥माध्वी देवी महाभागा मेघगम्भी-
रनिस्वना॥३॥ब्रह्मविष्णुशिवैर्ध्येया ज्ञातव्या
च विशेषतः॥ नाभौ वह्निशिखाकारा ललाटे
सूर्य्यसन्निभा ॥ ४ ॥ भ्रूमध्ये भास्कराकारा
सर्वाकारा हृदि स्थिता॥ कृतिहर्पदसंस्थाना
महाकालात्मिका त्रिका ॥ ५ ॥ वेद्या वेद्या-
त्मिका देवी पञ्चभूतजनप्रिया ॥ ब्रह्माण्डग-

ल० भिंणी [1]देवी सप्तावरणमातृका ॥६॥ सर्वम-
४० न्त्राक्षरा बीजा सर्वकामप्रदायिनी ॥ वैराज-
पुरविश्रान्तकुमारी कुशलात्मिका ॥७॥ अ-
चला निष्क्रिया देवी शिवदूती शिवात्मिका
॥ हिमविन्ध्याद्रिसंस्थाना काशीकाश्मीरसं-
स्थितिः ॥ ८ ॥ योगनिद्रा महानिद्रा विनि-

---

१ आदर्शपुस्तके तु 'देवि' एवं पाठः । अग्रेप्येवमेव ॥

द्रा तामसी क्रिया ॥ वसुवर्णा महागङ्गा महा-
कामार्थदायिनी ॥९॥ अजपा नाम या विद्या
महालक्ष्मी स्तुता सती ॥ प्रसादैकाक्षरा देवी
जीवन्ती जीवमातृका ॥१०॥ आसुरी राक्ष-
सी देवी कल्याणी कल्पनाकृतिः ॥ पञ्चना-
मात्मिका देवी सप्तनामात्मिका तथा ॥११॥
उद्गीता वासना वासी पञ्चाग्निविद्यया युता॥

४० पञ्चाग्निविद्यया प्रीता सर्वविश्वेश्वरी मता।
४१ ॥ १२ ॥ भक्तिलभ्या महादेवी न केनापि
विशेषिता॥सर्वरक्ष्या महाकाया ऋषिदेवन-
मस्कृता ॥१३॥ अष्टाष्टकमहारूपा प्रत्यक्षा-
दिप्रमात्मिका ॥ वेदशास्त्रमया देवी मिथ्या-
प्रपञ्चरूपिका ॥ १४ ॥ सत्यप्रपञ्चवादाख्या
विशेषा श्लोकरूपिणी ॥ आधिलोकाधियज्ञा-

ख्या अध्यात्मा चाधिदेवता ॥ १५ ॥ अधि-
कालाधिसङ्ख्या च पञ्चाख्या पञ्चसंहतिः ॥
उद्गृहिणी कला विद्या चेतना चित्तरञ्जना
॥१६॥ एकसङ्ख्या परार्द्धान्ता सङ्ख्या स-
ङ्ख्यास्वरूपिणी ॥ समुद्रव्योममध्यस्था
व्योम्नि बिन्दुसमाश्रिता॥१७॥वीणा सरस्व-
ती देवी वैणवी वेणुसम्भवा ॥ वलित्रयसमा-

ल० युक्ता भारती भरताश्रया ॥ १८ ॥ शब्दब्र-
४२ ह्मात्मिका देवी ज्ञानब्रह्मात्मिका परा ॥ ब्रह्म-
नाडी वरा देवी ब्रह्मकैवल्यरूपिणी ॥१९॥
कालिकेया महातारा महोदधिजलाश्रया ॥
वडवाग्निमुखा देवी योगिनी योगदायिनी
॥२०॥ महाभूता महादन्ता महाक्षेमप्रदा-
यिनी ॥ पञ्चभूता महाग्रासा पञ्चभूताधिदेव-

ता ॥ २१ ॥ सर्वप्रणवसम्पूर्तिः सर्वापत्ति-
निवारिणी ॥ ब्रह्माण्डबहिरन्तस्था वर्णमा-
त्राधिदेवता ॥ २२ ॥ आर्या शिवकरी देवी
प्रवरामरहेतुकी ॥ हेममाहा शिखाकारा त्रि-
शिखा पञ्चलोचना ॥ २३ ॥ सर्वाङ्गसमदा-
चारा मर्यादा शरपञ्जरा ॥ गीता गदाऽर्द्धच-
न्द्राभा सर्वान्तर्यामिरूपिणी ॥ २४ ॥ सामा-

ल० कारा स्मया सामा वीरभद्रा कलाश्रया ॥
४३ जीवनीया महातारा तरुणी तरणी हिमा
॥ २५ ॥ ज्योतिश्चक्रासना वासा वायुमार्ग-
प्रवर्तिनी ॥ दारिका सर्वभूतस्था सोमसूर्या-
भिसन्निभा ॥ २६ ॥ अर्द्धचन्द्रोपमा दंष्ट्रा
वह्न्यास्या वह्निसंस्थिता ॥ डाकिनी धाकिनी
देवी शाकिनी राकिनी तथा ॥२७॥ काकि-

नी कालिनी चैव षडाधाराऽधिदेवता ॥ सप्त-
हारा महाजिह्वा महापापप्रभञ्जिनी ॥ २८॥
महादुर्गा महोत्साहा बलोत्साहाधिदेवता ॥
भुवनज्ञानसम्पन्ना भुवनाकारसंयुता
॥ २९ ॥ शाश्वती शाश्वती लोका लोकानु-
ग्रहकारिणी ॥ सारसी मानसी हंसा हंसालो-
कप्रदायिनी ॥३०॥ योगमुद्रा करद्वन्द्वा भा-

ल० नुकोटिसमप्रभा ॥ लोकप्राणा महारेवा दुष्टि-
४४ का वज्रधारिणी ॥ ३१ ॥ सर्वसंकरदोषघ्नी
ग्रहोपद्रवनाशिनी । कलिदुःखप्रशमनी ग्र-
हदारिद्र्यभञ्जिनी ॥ ३२ ॥ सदा शान्ता सदा
देवी गृहे कलहभञ्जिनी ॥ महादेवी निवासा-
ख्या भाविनी भाविता शिवा ॥ ३३ ॥ गौणी
लाक्षणिकी मुख्या जघन्या वृत्तिवर्जिता ॥

वास्तवी वृत्तिरूपा सा वस्तुरूपा परिच्छदा
॥३४॥ छन्दांसि छन्दरूपा सा मन्त्रा स्वच्छ-
न्दरूपिणी ॥ नरमाला नरत्रासी निःशेषग्र-
हरूपिणी॥३५॥सदानन्दा सदाकारा निष्प्र-
पञ्चा निराश्रया॥सत्या सत्यरमारामा रमणी
मृत्युभञ्जिनी ॥ ३६ ॥ ज्येष्ठा कनिष्ठा सा
देवी वली गार्गी मुनिप्रिया॥ मैत्रेयी मित्रवि-

८० द्यार्था शेषा शेषकलाश्रया ॥ ३७ ॥ वारा-
४५ णस्याश्रिता देवी मृत्युस्तत्रैव गच्छति ॥
अन्तर्बहिर्वाराणसीदायिनी दानशालिनी
॥ ३८ ॥ सर्वज्ञानमयी देवी सत्यज्ञानमयी
शुभा॥उत्पत्तिस्थितिसंहारहेतुकी जगतामि-
ति॥ ३९ ॥ नमस्तेऽस्तु महालक्ष्मि नमस्ते
परमेश्वरि ॥ नमस्ते सर्वलोकानां मातर्नित्ये

शिवेऽव्यये ॥ ४० ॥ सर्वज्ञे सर्वजननी सर्व-
शक्तिस्वरूपिणी॥ सिद्धिलक्ष्मीर्महाकाली म-
हालक्ष्मी नमोऽस्तु ते ॥४१॥ भक्तानुग्राहि-
के देवि करुणासागराम्बिके॥सिद्धिलक्ष्मी०
॥ ४२ ॥ सद्योजातादिपञ्चाग्निरूपा पञ्चकप-
ञ्चके ॥ सिद्धिलक्ष्मी० ॥ ४३ ॥ सिद्धज्ञानम-
ये देवि पञ्चेन्द्रियविवर्जिते ॥ सिद्धिलक्ष्मी०

॥ ४४ ॥ स्वयंप्रकाशा नित्याख्या प्रकाशा
कामरूपिणी ॥ सिद्धिलक्ष्मी० ॥ ४५ ॥ स-
त्यज्ञानमये देवि नित्यानन्दे सदाशिवे ॥ सि-
द्धिलक्ष्मी० ॥ ४६ ॥ सृष्ट्यादिकारिणी देवी
उत्पत्त्यादिप्रभेदिनी॥सिद्धिल०॥४७॥शा-
कम्भरी वैष्णवी च ब्राह्मी प्रकृतिरीश्वरी ॥
सिद्धिलक्ष्मी० ॥ ४८ ॥ अविद्यापटलध्वंसी

विद्याद्वयविशेषिते॥सिद्धिलक्ष्मी० ॥ ४९ ॥
सद्योजाते वामघोरे तत्पुरुषेशानरूपिणी ॥
सिद्धिलक्ष्मी० ॥ ५० ॥ अष्टादशकभेदेशे
वैष्णवी लोकधारिणी ॥ सिद्धिल० ॥ ५१ ॥
नवकोटिप्रभेदेशे चामुण्डे परमेश्वरि ॥ सि-
द्धिलक्ष्मी०॥५२॥ अनन्तकोटिभेदेशे ब्राह्मी
देवी प्रकीर्तिता ॥ सिद्धि० ॥ ५३ ॥ मातुलि-

ङ्गं गदा खेटं पानपात्रं च बिभ्रती ॥ सिद्धि०
॥ ५४ ॥ नागलिङ्गं च योनिं च बिभ्रती पर-
मेश्वरी ॥ सिद्धि० ॥५५॥ लक्ष्यालक्ष्यस्वरूपे-
ण व्याप्य कृत्स्नं व्यवस्थिते ॥ सि० ॥५६॥
सर्वमङ्गलमाङ्गल्ये शिवे नारायणप्रिये ॥
सिद्धि० ॥ ५७ ॥ उमादेवि नमस्तेऽस्तु देवि
प्रणवसंज्ञके ॥ सिद्धि० ॥५८॥ दुष्टविद्रावि-

णी देवी दुःखदारिद्र्यभञ्जिनी॥सिद्धि०॥५९॥
सर्वसंकरदोषघ्नी सर्वापत्तिनिवारिणी ॥ सि-
द्धि० ॥६०॥ सनत्कुमार उवाच ॥ एवं स्तु-
त्वा महालक्ष्मीं श्रीसूक्तेनापि चास्तुवन् ॥
हिरण्यवर्णामित्यादि श्रीसूक्तमिति संहि-
ता ॥ ६१ ॥ एवं स्तुता महालक्ष्मी ब्रह्मवि-
ष्णुमहेश्वरैः ॥ प्राह गम्भीरया वाचा दर्श-

ल० यन्ती स्वकां तनुम् ॥ ६२ ॥ श्रीमहाल-
४८ क्ष्म्युवाच ॥ शृणुध्वं देवदेवेशा ब्रह्मविष्णु-
महेश्वराः ॥ वरं ददामि तुष्टाऽहं इच्छा मन-
सि वर्तते ॥ ६३ ॥ देवा ऊचुः ॥ आसं सर्वे
पुरास्माभिस्त्वजरा च सुरेश्वरि॥उत्पत्तिस्थि-
तिसंहारहेतुकं शक्तिरूपकम् ॥ ६४ ॥ अभि
न्नरूपतास्माकमीश्वरेण तया पुरा ॥ उत्पत्ति-

स्थितिसंहारहेतुको भेद आश्रितः ॥ ६५ ॥
यथापूर्वं वरोऽस्माकमीश्वराभेदलक्षणम् ।
तदेवाऽस्तु महालक्ष्मीः किमन्येन वरेण तु
॥ ६६ ॥ पठतां शृण्वता स्तोत्रं वरमेतं प्र-
यच्छ भोः॥दुष्टविद्रावणं देवि दुःखदारिद्यभ-
ञ्जनम्॥६७॥ आयुष्यं च तथाऽऽरोग्यं सर्वो-
पद्रवनाशनम् । अणिमादिगुणैश्वर्यं जाति-

८० स्मरणमेव च ॥६८॥ वाराणस्याः स्मृतिश्चै-
४९ व स्वच्छन्दमरणं तथा । स्वपरायुष्यमर्या-
दो वैराग्यपदवी तथा ॥ ६९ ॥ ईषणात्रय-
निर्मुक्तिः साम्राज्यपदवी तथा । सर्वज्ञत्वं
तथा भक्तिं वीतरागत्वमेव च ॥७०॥ किं-
मत्र बहुनोक्तेन तारकं ब्रह्मसंज्ञिकम् ॥ उपदे-
शे शिवे देवि प्रसादं कर्तुमर्हसि ॥ ७१ ॥

सनत्कुमार उवाच ॥ नाम्नामष्टसहस्रं तु
जपध्वं सर्वकामिकम् ॥ अपि पूज्यं महाभा-
गा योगिनः शान्तमानसाः ॥ ७२ ॥ एव-
मस्त्विति तानुक्त्वा कनकाम्बरभूषणा ।
क्षणादन्तर्हिता देवी त्रयाणामपि पश्यताम्
॥ ७३ ॥ गार्ग्य उवाच ॥ तस्माद्यूयं महा-
भागा ऋषयः सर्वकाङ्क्षिणः ॥ जयध्वं नित्य-

ल० कल्पेन सर्वान्कामानवाप्स्यथ ॥ ७४ ॥ एव-
५० मुक्त्वा तु योगीन्द्रान्सनत्कुमार ईश्वरः । क्ष-
णादन्तर्हितो देवः सर्वेषामेव पश्यताम्
॥७५॥ अष्टम्यां च चतुर्दश्यां नवम्यां च
वने स्थितः । पौर्णमास्याममावास्यां विशे-
षेण प्रकीर्तितम् ॥ ७६ ॥ सर्वान्कामानवा-

१ मायां वेति साधुः ।

प्नोति पुस्तकं चापि पूजयेत् ॥ पठितान् ग्रा-
हयेत्पञ्च सद्यः सिद्धिमवाप्नुयात् ॥ ७७ ॥
कुले न जायते तस्य दारिद्र्यं कलहावहम् ।
महापातकजान् दोषान्सर्वान् व्याधींश्च ना-
शयेत् ॥ ७८ ॥ बहुलां श्रियमाप्नोति साध-
कीं पुण्यहेतुकीम् ॥ इत्याह भगवान् गार्ग्य
ऋषिभ्यः स्तोत्रमुत्तमम् ॥ ७९ ॥ महाल-

ल० क्ष्म्या महादेव्या नाम्नामष्टसहस्रकम्।सप्तज-
५१ न्मसु दारिद्र्यं स्तोत्रपाठाद्विनश्यति ॥ ८० ॥
यस्येदं तिष्ठते गेहे पुस्तकं लक्ष्मीरूपकम् ।
न तत्राग्निभयं घोरं सर्वरोगादिसम्भवम् ॥
॥८१॥ यश्चैतां पूजयेद्भक्त्या पुस्तकं च यथा-
विधि । तेन तुष्टं भवेन्नित्यं त्रैलोक्यं सचरा-
चरम् ॥८२॥ जायन्ते बहवः पुत्रा धनधान्य-

वराः स्त्रियः। रत्नान्यश्वा गजा गावस्तेषामाशु
भवन्ति हि॥ ८३॥ इति श्रीउमामहेश्वरसं-
वादे श्रीमहालक्ष्मीसहस्रनामस्तोत्रं स-
म्पूर्णम्॥ ॥ ॥
अथ लक्ष्मीस्तोत्रम्॥ रमा च कमला ल-
क्ष्मीश्चला भूतिर्हरिप्रिया॥ पद्मा पद्मालया
सम्पदुच्चैः श्रीः पद्मधारिणी॥ १॥ द्वादशै-

ल० तानि नामानि लक्ष्मीं सम्पूज्य यः पठेत् ।
५२ स्थिरा लक्ष्मीर्भवेत् तस्य पुत्रदारादिभिः
सह ॥ इति श्रीविश्वसारोद्धारे लक्ष्मीस्तोत्रं
समाप्तम् ॥ ॥ ॥ ॥

॥ इति श्रीलक्ष्मीपञ्चाङ्गः समाप्तः ॥

॥ अथ तन्त्रोक्तं लक्ष्मीकवचं प्रारभ्यते ॥

॥ श्रीकृष्णाय नमः ॥ ॐ अस्य श्रीलक्ष्मी-

कवचस्तोत्रस्य श्रीईश्वरो देवता अनुष्टुप् छंदः ॥ श्रीलक्ष्मीप्रीत्यर्थे पाठे विनियोगः ॥ ॐ लक्ष्मी मे चाग्रतः पातु कमला पातु पृष्ठतः ॥ नारायणी शीर्षदेशे सर्वाङ्गे श्रीस्वरूपिणी ॥ १ ॥ रामपत्नी तु प्रत्यङ्गे सदाऽवतु रामेश्वरी ॥ विशालाक्षी योगमाया कामारी चक्रिणी तथा ॥ २ ॥ जयदात्री

ल० धनदात्री पाशाक्षमालिनी शुभा ॥ हरिप्रि-
५३ या हरिरामा जयङ्करी महोदरी ॥ ३ ॥ कृ-
ष्णपरायणा देवी श्रीकृष्णमनमोहिनी ॥
जयङ्करी महारौद्री सिद्धिदात्री शुभङ्करी ॥
॥ ४ ॥ सुखदा मोक्षदा देवी चित्रकूटनि-
वासिनी ॥ भयं हरतु भक्तानां भवबन्धं
विमुच्यतु ॥ ५ ॥ कवचं तन्महापुण्यं यः

पठेद्भक्तिसंयुतः ॥ त्रिसंध्यमेकसन्ध्यं वा
मुच्यते सर्वसंकटात् ॥ ६ ॥ एतत्कवचस्य
पठनं धनपुत्रविवर्धनम् ॥ भीतेर्विनाशनञ्चैव
त्रिषु लोकेषु कीर्तितम् ॥ ७ ॥ भूर्जपत्रे
समालिख्य रोचनाकुंकुमेन तु । धारणाद्गल-
देशे च सर्वसिद्धिर्भविष्यति ॥ ८ ॥ मोक्षा-
र्थी मोक्षमाप्नोति कवचस्य प्रसादतः ॥ ग-

ल० र्भिणी लभते पुत्रं वन्ध्या च गर्भिणी भवे-
५४ त् ॥ ९ ॥ धारयेदापि कण्ठे च अथवा
वामबाहुके ॥ यः पठेन्नियतं भक्त्या स एव
विष्णुवद्भवेत् ॥ १० ॥ मृत्युव्याधिभयं तस्य
नास्ति किञ्चिन्महीतले ॥ पठेद्वा पाठये-
द्वाऽपि शृणुयाच्छ्रावयेद्यदि ॥ ११ ॥ सर्व-
पापविमुक्तस्तु लभते परमां गतिम् ॥ संकटे

विपदे घोरे तथा च गहने वने ॥१२॥ रा-
जद्वारे च नौकायां तथा च रणमध्यतः ॥
पठनाद्धारणादस्य जयमाप्नोति निश्चितम्
॥१३॥ अपुत्रा च तथा वन्ध्या त्रिपक्षं शृ-
णुयाद्यदि ॥ सुपुत्रं लभते सा तु दीर्घायुष्कं
यशस्विनम् ॥ १४ ॥ शृणुयाद्यः शुद्धबुद्ध्या
द्वौ मासौ विप्रवक्त्रतः ॥ १५ ॥ सर्वान्का-

७० मानवाप्नोति सर्वबंन्धाद्विमुच्यते ॥ मृतव-
५५ त्सा जीववत्सा त्रिमासं श्रवणं यदि ॥१६॥
रोगी रोगाद्विमुच्येत पठनान्मासमध्यतः ॥
लिखित्वा भूर्जपत्रे च अथवा ताडपत्रके
॥१७॥ स्थापयेन्नियतं गेहे नाग्निचौरभयं
क्वचित् ॥ शृणुयाद्धारयेद्वापि पठेद्वा पाठये-
दपि ॥ १८ ॥ यः पुमान्सततं तस्मिन्प्रसन्नाः

सर्वदेवताः ॥ बहुना किमिहोक्तेन सर्वजी-
वेश्वरेश्वरी ॥ १९ ॥ आद्या शक्तिर्महाल-
क्ष्मीर्भक्तानुग्रहकारिणी ॥ धारके पाठके
चैव निश्चला निवसेद् ध्रुवम् ॥ इति तन्त्रोक्तं
लक्ष्मीकवचं समाप्तम् ॥

॥ अथ श्रीसिद्धिलक्ष्मीस्तोत्रं प्रारभ्यते ॥

॥ श्रीकृष्णाय नमः ॥ ॐ अस्य श्रीसिद्धिल-

क्ष्मीस्तोत्रमन्त्रस्य हिरण्यगर्भो ऋषिः ॥ महा-
लक्ष्मीर्देवता अनुष्टुप् छंदः ॥ ॐ बीजं ह्रीं
शक्तिः श्रीं क्लीं कीलकं ॥ मम सकलकामना-
सिध्यर्थं जयैश्वर्यलक्ष्मीप्राप्त्यर्थं श्रीसिद्धि-
लक्ष्मीस्तोत्रजपे विनियोगः ॥ ॐश्रीसिद्धि-
लक्ष्मीः अं ॐ ह्रीं विष्णुहृदयाय न० ॥ ॐ
क्लीं अमृतानंदिनि म० ॐ सिद्धिदैतमालि-

नि अ० । ॐ तेजप्रकाशिनीक० ॐ श्रीं ह्रीं
क्लीं ॐ ब्राह्मीवैष्णवीरुद्राणी क० । एवं हृद्-
यादिन्यासः ॥ चतुर्विधकामनार्थे जपे विनि-
योगः ॥ अथ ध्यानम् ॥ (ॐ ह्रीं) ब्राह्मीं च
वैष्णवीं रौद्रीं षड्भुजां च चतुर्मुखाम् ॥ त्रि-
नेत्रां खड्गत्रिशूल—पद्मचक्रगदाधराम् ॥१॥
पीताम्बरधरां देवीं नानालंकारशोभिताम् ॥

८० तेजःपुञ्जधरां श्रेष्ठां ध्यायेद्बालकुमारिकाम्॥
५७ ॐकारलक्ष्मीरूपेण विष्णोर्हृदयसंस्थिताम्
॥ २॥ विष्णुमानन्दमध्यस्थां ह्रींकारबीजरू-
पिणीम्॥ क्लीं अमृतानंदिनी भद्रे सदानंद-
प्रदायिनी ॥ ३ ॥ श्रीं दैत्यरमणीशक्तिर्मा-
लिनी शत्रुमर्दिनी ॥ ४ ॥ तेजःप्रकाशिनी
देवी वरदा शुभदायिनी ॥ ब्राह्मी च वैष्ण-

वी रौद्री कालिका रक्तसम्भवा ॥ ५ ॥ आ-
कारो ब्रह्मरूपेण ॐकारं विष्णुमव्ययम्॥आ
कारे शिवरूपं च देवी प्रणव उच्यते॥६॥ सु-
र्यकोटिप्रतीकाशां चन्द्रकोटिसमप्रभाम् ॥
तन्मध्ये तु निशाकारां ब्रह्मरूपव्यवस्थि-
ताम् ॥ ७ ॥ कौमारी परमानंदी क्रियते सू-
खसुंदरी ॥ सिद्धिलक्ष्मीर्मोहलक्ष्मी आद्य-

लक्ष्मीर्नमोऽस्तुते ॥ ८ ॥ सर्वमङ्गलमाङ्गल्ये
शक्ते सर्वार्थसाधिके ॥ शरण्ये त्र्यम्बके गौरि
नारायणि नमोऽस्तुते ॥ ९ ॥ प्रथमं चाम्बि-
का गौरी द्वितीयं वैष्णवी तथा ॥ तृतीयं
कमला प्रोक्ता चतुर्थं सुंदरी तथा ॥ १० ॥
पञ्चमं विष्णुपत्नी च षष्ठं कात्यायनीति च ॥
सप्तमं कालरात्रिश्च ह्यष्टमं हरिवल्लभा ॥

॥ ११ ॥ नवमं खड्गिनी शूला दशमं देव-
दंबिका ॥१२॥ "ॐ श्रीं ह्रीं क्लीं ॐ सिद्धि-
लक्ष्म्यै नमः स्वाहा" ॥ लक्ष्मीप्रदमिमं मन्त्रं
यः पठेत्सततं नरः ॥ सर्वपापविशुद्धात्मा
नात्र कार्या विचारणा ॥ १३ ॥ एकमासं
द्विमासं च त्रिमासं चतुरस्तथा ॥ पञ्चमासं
च षण्मासं त्रिकालं चैव यः पठेत् ॥१४॥

८० क्लेशदुःखविहीनश्च दारिद्र्यभववर्जितः ॥ ज-
५९ न्मान्तरसहस्रेषु मुच्यते सर्वकिल्बिषैः ॥
॥ १५ ॥ अलक्ष्मीर्लभते लक्ष्मीमपुत्रो पुत्र-
वर्द्धनम् ॥ धन्यो यशस्वी शत्रुघ्नो वह्नि-
चौरभयेषु च ॥ १६ ॥ शाकिनीभूतवेता-
लसर्पव्याघ्रनिपातिनी ॥ राजद्वारे सभा-
स्थाने कारागृहनिबन्धने ॥ १७ ॥ ईश्वरेण

कृतं स्तोत्रं प्राणिनां हितकारकम् ॥ स्तुव-
न्तु ब्राह्मणा नित्यं दारिद्र्यं न च बाधते ॥
॥ १८ ॥ सर्वपापहरा देवी सर्वसिद्धिप्रदा-
यिनी ॥ सर्वरूपमया देवी सर्वसिद्धिप्रदा-
यिनी ॥१९॥ सर्वरूपमया देवी सर्वं देवी-
मयं जगत् ॥ २० ॥ इ० ब्र० पु० सिन्धुम०
इ० वी० संवादे ल० समाप्तम् ॥

ल० अथ श्रीवागीश्वरीस्तोत्रम् ॥

६० श्रीकृष्णाय नमः ॥ ॐ आरूढा श्वेतहंसे
कुमतिवनदहे दक्षिणे चाक्षसूत्रं वामे हस्ते च
दिव्यं वरकनकमयं पुस्तकं ज्ञानगम्यम् ॥
स्वां वीणां वादयन्तीं स्वकरसुकरजैः शास्त्र-
विज्ञानशब्दैः क्रीडन्ती दिव्यरूपा वरकमल-
धरा भारती सुप्रसन्ना ॥ १ ॥ ॐ अस्य श्री

सिद्धसरस्वतीस्तोत्रमन्त्रस्य सनत्कुमारो भगवान् ऋषिः शिरसि। अनुष्टुप् छंदःमुखे। सिद्धसरस्वतीदेवता हृदि। ऐं बीजं दक्षिणहस्ते। ॐ वदवदेति शक्तिः वामहस्ते॥ ॐ सर्वविद्याप्रपन्नेति कीलकं हृदि। मम जिह्वाग्रे अखिलवाग्विलाससिद्ध्यर्थे जपे विनियोगः॥ करसम्पुटे मूलेन करशुद्धिः॥ ॐ

९० हाँ ह्रीं ह्रूँ अंगुष्ठाभ्यां नमः ॥ ॐ ऐं श्रीं
९१ ह्रीं तर्जनीभ्यां नमः ॥ ॐ क्लाँ क्लीं क्लूँ मध्य-
माभ्यां नमः ॥ ॐ श्राँ श्रीं श्रूँ अनामिका-
भ्यां नमः ॥ ॐ आँ ह्रीं क्रौँ कनिष्ठिकाभ्या
नमः ॥ ॐ ध्राँ ध्रीं ध्रूँ करतलकरपृष्ठाभ्यां
नमः ॥ एवं हृदयादिन्यासः ॥ ॐ भूर्भुवः-
स्वरोम् ॥ दिग्बन्धनम् ॥ रं रं अग्निप्राका-

रान्‌ ॥ मूलेन व्यापकं कुर्यात्‌ ॥ मं मंडूका-
दिपीठशक्तिभ्यो नमः ॥ हृदयाष्टदले ॥
ॐ ह्र्यौं सरस्वतीयोगपीठासनाय नमः॥म-
ध्ये मूले मूर्तिकल्पनम्‌ ॥ ध्यानम्‌ ॥ दोर्भि-
र्युक्ता चतुर्भिः स्फटिकमणिमयीमक्षमालां
दधाना हस्तेनैकेन पद्मं सितमपि च शुकं
पुस्तकं चापरेण ॥ या सा कुन्देन्दुशंखस्फ-

ल० टिकमणिनिभा भासमाना समाना सा मे
६२ वाग्देवदेवी निवसतु वदने सर्वदा सुप्रस-
न्ना ॥ १ ॥ मनसा सम्पूज्य ॥ अक्षमाला-
पद्मांकुशपुस्तकवीणायोनिमुद्रां प्रदर्श्य ॥
सर्षपान् दिक्षु क्षिप्त्वा जपेत् अष्टोत्तरशत-
म् ॥ ॐ ऐँ क्लीं सौं ह्रीं श्रीं ध्रीं वद वद वा-
ग्वादिनि सौं क्लीं ऐं सरस्वत्यै नमः ॥ अने-

न जपकृतेन श्रीसरस्वती प्रीयता नमम ॥
अथ स्तुतिः ॥ ॐ अस्य श्रीसरस्वतीस्तो-
त्रमन्त्रस्य मार्कण्डेयऋषिः स्रग्धराऽनुष्टुप्-
छन्दः श्रीसरस्वती देवता मम वाक्सिद्ध्यर्थे
जपे विनियोगः ॥ ॐ शुक्लां ब्रह्मविचारसार
परमामाद्यां जगद्व्यापिनीं वीणापुस्तकधा-
रिणीमभयदां जाड्यान्धकारापहाम् । हस्ते

ल० स्फाटिकमालिकां विदधतीं पद्मासने संस्थि-
६३ तां वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥१॥ ॐ ह्रीं ह्रींह्रीं हृद्यबीजे शशि-रुचिरकलाकल्पविस्पृष्टशोभे भव्ये भव्यानुकूले कुमतिवनदहे विश्ववन्द्याङ्घ्रिपद्मे ॥ पद्मे पद्मोपविष्टे प्रणतजनमनोमोदसम्पादयित्रि प्रोत्फुल्लज्ञानकूटे हरिहरदयिते देवि

संसारसारे ॥ २ ॥ ॐ ऐं ऐं ऐं जाप्यतुष्टे-
हिमरुचिमुकुटे वल्लकीव्यग्रहस्ते मातर्मात-
र्नमस्ते दह दह जडतां देहि बुद्धिं प्रश-
स्ताम् ॥ विद्ये वेदान्तगीते श्रुतिपदपठिते
मोक्षदे मुक्तिमार्गे मार्गातीतस्वरूपे भव
मम वरदा शारदे शुभ्रवर्णे ॥ ३ ॥ ॐ ध्रीं
ध्रीं ध्रीं धारणाख्ये धृतिमतिनुतिभिर्नामभिः

ल० कीर्त्तनीये नित्यानित्येऽनुमीते मुनिजनन-
६४ मिते नूतने वै पुराणे ॥ पुण्ये पुण्यप्रवाहे
हरिहरनमिते पूर्णसत्वे सुवर्णे मात्रे मात्रा-
र्द्धतत्वे प्रतिमतिमतिदे माधवप्रीतिनादे ॥
॥ ४॥ ॐ क्लीं क्लीं क्लीं ॥ स्वस्वरूपे दह दह
दुरितं पुस्तकव्यग्रहस्ते सन्तुष्टाकारचित्ते
स्मितमुखि सुभगे जृम्भिणि स्तम्भविद्ये ॥

मोहे मुग्धे प्रबोधे मम कुरु कुमतिध्वान्त-
विध्वंसमीड्ये गीर्गौर्वाग्भारती त्वं कविवर-
रसने सिद्धिदे सिद्धिसाध्ये ॥ ५ ॥ ॐ सौं
सौं सौं शक्तिबीजे कमलभवमुखाम्भोजभू-
तस्वरूपे रूपे रूपप्रकाशे सकलगुणमये
निर्गुणे निर्विकारे ॥ न स्थूले नैव सूक्ष्मे-
प्यविदितविभवे जाप्यविज्ञानतत्वे विश्वे

ल० विश्वांतराले सकलविधिमये निष्कले नि-
६५ त्यशुद्धे ॥ ६ ॥ स्तौमि त्वां त्वां च वन्दे
मम खलु रसनां मा कदाचिज्जहीथा मा
मे बुद्धिर्विरुद्धा भवतु मम मनो यातु मा देवि
पापम् ॥ मा मे दुःखं कदाचित्क्वचिदपि स-
मये पुस्तके नाकुलत्वं शास्त्रे वादे कवित्वे
प्रसरतु मम धीर्मास्तु कुण्ठा कदाचित्

॥ ७ ॥ इत्येतैः श्लोकमुख्यैः प्रतिदिनमुष-
सि स्तौति यो भक्तिनम्रो वाण्या वाचस्पते-
रप्यविदितविभवो वाक्पटुर्मृष्टकण्ठः ॥ स
स्यादिष्टार्थलाभी सुतमिव सततं पाति तं
सा च देवी सौभाग्यं तस्य लोके प्रसरति
कविताविघ्नमस्तं प्रयाति ॥ ८ ॥ निर्विघ्नं त-
स्य विद्या प्रभवति सततं चाश्रुतग्रन्थबोधः

ल० कीर्तिस्त्रैलोक्यमध्ये निवसति वदने शारदा
६६ तस्य साक्षात् ॥ दीर्घायुर्लोकपूज्यः सकल-
गुणनिधिः सन्ततं राजमान्यो वाग्देव्याः स
प्रसादात्त्रिजगति विजयी जायते सत्सभासु
॥ ९ ॥ ब्रह्मचारी व्रती मौनी त्रयोदश्यां नि-
रामिषः ॥ सारस्वतं शतं पाठी स स्यादि-
ष्टार्थलाभवान् ॥१०॥ पक्षद्वये त्रयोदश्यामे-

कविंशतिसङ्ख्यया॥अविच्छेदं पठेद्यस्तु स
कवित्वं लभेद्ध्रुवम्॥११॥इति श्रीसनत्कुमार-
संहितायां श्रीवागीश्वरीस्तोत्रं सम्पूर्णम् ॥

श्रीमहालक्ष्मीपञ्चाङ्गं समाप्तम् ॥

हमारे प्रकाशनों की अधिक जानकारी व खरीद के लिये हमारे निजी स्थान :

खेमराज श्रीकृष्णदास
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग,
७ वी खेतवाडी बँक रोड कार्नर,
मुंबई - ४०० ००४.
दूरभाष/फैक्स-०२२-२३८५७४५६.

खेमराज श्रीकृष्णदास
६६, हडपसर इण्डस्ट्रियल इस्टेट,
पुणे - ४११ ०१३.
दूरभाष-०२०-२६८७१०२५.
फैक्स-०२०-२६८७४९०७.

गंगाविष्णु श्रीकृष्णदास,
लक्ष्मी वेंकटेश्वर प्रेस व बुक डिपो
श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डींग,
जूना छापाखाना गली, अहिल्याबाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र - ४२१ ३०१.
दूरभाष/फैक्स- ०२५१-२२०९०६१.

खेमराज श्रीकृष्णदास
चौक, वाराणसी (उ.प्र.) २२१ ००१.
दूरभाष - ०५४२-४२००७८.

KHEMRAJ SHRIKRISHNADASS